# श्री शौरिराज दशकम्

कृष्णाटवीकृतावासं कृष्णमेघ कृपानिधिम् ।
शौरिराजमहं वन्दे सूरिबृन्दैस्सदा स्तुतम् ।। १

नवनीतदधि प्रीतं नवनीरद सन्निभम् ।
नवं नवं च संदृश्यं शौरिराजमहं भजे ।। २

उत्पलावतके नित्यं नित्यपुष्करिणीतटे ।
उद्यत्सूर्यसहस्राभं वन्दे शौरिविभुं हरिम् ।। ३

तापत्रयहरं देवं वेदत्रयनुतं प्रभुम् ।
लोकत्रय प्रणेतारं वन्देऽहं शौरिभूपतिम् ।। ४

शौरिराजकृपासिन्धो देव देव जगत्पते ।
वारिजानाथ विश्वेश रक्ष मां शरणागतम् ।। ५

पद्मिनीप्राणनाथाय परब्रह्म स्वरूपिणे ।
शौरिराजाय देवाय नित्यमेव नमो नमः ।। ६

शौरिराजसमो देवः न भूतो न भविष्यति ।
कृष्णारण्यसमं क्षेत्रं भूतले नैव विद्यते ।। ७

वसुदण्डक पक्षीन्द्र विभीषण मुखैर्नुत ।
अन्वहं त्वां प्रपन्नोऽस्मि शौरिराज नमोऽस्तुते ।। ८

भट्टवर्यवचः सत्यं कर्तुं चोलपतेः पुरः ।
केशपाशं धृतं येन तं शौरिं प्रणमाम्यहम् ।। ९

मुनैयधरमुद्रान्नं प्रतिगृह्य प्रसादितम् ।
शय्यां रात्रौ मुखं नित्यं गच्छते शौरये नमः ।। १०

मङ्गलं दिशताच्छौरिः मङ्गलायतनो हरिः ।
पद्मिन्यासहितो देवः कुर्यात् सर्वत्र मङ्गलम् ।। ११